कोषात् । १यज्ञार्थे पशुहनने अमरः “या वेदविहिता हिंसा नियतास्मिंश्चराचरे । अहिंसामेव तां विद्यात्” इति मनूक्तेस्तस्या अहिंसात्वेन हि प्राशस्त्यम् ।

**परम्परीण** त्रि० परम्परया धारया आगतः ख । अविच्छेदसन्तत्यागते भट्टिः ५सर्गः । [युगीन तत्र साधौ त्रि० ।

**परयुग** न० कर्म० । उत्तरवर्त्तियुगे तत्र साधुः खञ् । पार-

**परल** पु० पृ—बा० अल । केशराजे त्रिका० ।

**पररूप** त्रि० परस्य रूपमिव रूपमस्य । स्वोत्तरवर्त्तिपरस्येव रूपवति “एङि पररूपम्” पा० ।

**परलोक** पु० कर्म० । लोकान्तरे स्वर्गादौ । तत्र स्थितादि ठञ् अनुशतिका०द्विपदवृद्धिः । पारलौकिक तत्र स्थितादौ त्रि० ।

**परलोकगम** पु० परलोकं लोकान्तरं गमयति गम—णिच्—अच् । मृत्यौ हेमच० ।

**परवत्** त्रि० परः नियोजकतयाऽस्त्यस्य मतुप् मस्य वः । पराधीने हेमच० स्त्रियां ङीप् ।

**परवश** त्रि० परस्य वश आयत्तता यत्र । पराधीने हेमच० ।

**परवाणि** पु० परं वाणयति वण—णिच्-इन् । १धर्माध्यक्षे २वत्सरे मेदि० । ३कुमारवाहने मयूरे शब्दमा० ।

**परवाद** पु० ६त० । १परस्यापवादे कर्म० । २उत्तरवादे च ।

**परवादिन्** पु०कर्म० । प्रत्यर्थिनि उत्तरवादिनि स्त्रियां ङीप् ।

**परव्रत** पु० परं व्रतमस्य । धृतराष्ट्रे शब्दमाला ।

**परश** पु० स्पर्श+पृषो० । स्पर्शमणौ यस्य स्पर्शात् इतरस्य धातोः स्वर्णता तादृशे रत्नभेदे ब्रह्मवै०जन्मख० ४अ० ।

**परशव्य** त्रि० परशौ हितं यत् । परशुहिते

**परशु** पु० परं शृणाति शॄ—कु डिच्च । १परश्वधे (टाङ्गी) अस्त्रभेदे । स्पृश—अयुन् पृ आदेशः । पर्शुरप्यत्र २अस्त्रमात्रे च । परशुलक्षणञ्च हेमा० कौशनसनीतिशास्त्रोक्तं कुठारशब्दे २०७४ पृ० दर्शितम् ।

**परशुराम** पु० परशुधारी रामः शा०त० । जमदग्निजे भगवदवतारभेदे येन परशुना त्रिःसप्तकृत्वो भूमिर्निःक्षत्रिया कृता । अस्योत्पत्त्यादिकं यथा “अथ काले व्यतीते तु जमदग्निर्महातपाः । विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम् । भार्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम् । सा तस्मात् सुषुवे पुत्रान् चतुरो वेदसम्मतान् । रुमण्वन्तं सुषेणञ्च विश्वं विश्वावसुन्तथा । पश्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः । कार्त्तवीर्य्यवधायाशु शक्राद्यैः सकलैः सुरैः । याचितः पञ्चमः सोऽभूत्तेषां रामाह्वयस्तु यः । भारावतरणार्थाय जातः परशुना सह । सहजः परशुस्तस्य तं जहाति कदाच न । अयं निजपितामह्यास्वरुभक्तिविपर्य्ययात् । ब्राह्मणः क्षत्रियाचारो रामोऽभूत् क्रूरकर्मकृत् । स वेदानखिलान् ज्ञात्वा धनुर्वेदांश्च सर्वशः । सत्ततात् कृतकृत्योऽभूद्वेदविद्याविशारदः” कालिकापु० ८५अ० ।

**परशुधर** पु० परशुं धरति धृ—अच् । १गणेशे हलायु० । २परश्वधधारिमात्रे त्रि० ३जामदग्न्ये परशुरामे पु० ।

**परशुमुद्रा** स्त्री मुद्राभेदे “तर्ज्जनीमध्यमानामाकनिष्ठाङ्गुष्ठमुष्टिका । अधोमुखी दीर्घरूपा मध्यमा विम्नमुद्रिका । परशुमुद्रा कथिता सिद्धिदा लड्डुमुद्रिका” तन्त्रसारः ।

**परशुवन** न० परशुवत्पत्रयुक्तं वनम् शा०त० । नरकभेदे भा०व० २२३अ० ।

**परश्व(स्व)ध** पु० श्वि—ड श्वो वृद्धिः परस्य श्वं धयति, परस्य स्वं काष्ठं धयति वा धे—क । कुठारे अस्त्रभेदे अमरः ।

**परश्वस्** अव्य० परः+श्वस्+पृषो० । आगामिदिनात् परदिने अमरटीका ।

**परस्** अव्य० परस्मात् परस्मिन् परो वा पर+पञ्चम्याद्यर्थे बा० असि । पञ्चम्याद्यर्थवृत्तौ परशब्दार्थे यजु०५।४२

**परसंज्ञक** पु० परः संज्ञाऽस्य कप् । देहादिभ्यः परस्मिन् आत्मनि शब्दच० ।

**परसवर्ण** पु० समानवर्णः सवर्णः ३त० । परेण उत्तरवर्त्तिना वर्णेन समानवर्णे पा० ८।४भा० ।

**परस्तर** त्रि० तरस्तरणीयः परः सातिशयस्तृतत्वं तरः पारस्करा० । अतिशयेन तरणीये ऋ० १०।१५५।२

**परस्तात्** अव्य० पर+पञ्चम्याद्यर्थे अस्ताति । पञ्चम्याद्यर्थवृत्तौ परशब्दार्थे परस्तात् ग्रामः ग्रामात् ग्रामे वा ।

**परस्त्री** स्त्री ६त० । परकीयायां स्त्रियां तत्र भवादि अण् नलागमः अनुशतिका०द्विपदवृद्धिः । पारस्त्रैण परस्त्रियां भवादौ त्रि० ।

**परस्पर** त्रि० “सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्” वार्त्ति० “समासवद्भावे पूर्वपदस्य सुर्वक्तव्यः” वार्त्ति० सुः । इतरेतरशब्दार्थे अत्र स्त्रीक्लीवयोस्तु “स्त्रीनपुंसकयोरुत्तरपदस्याया विभक्तेरामूभावो वक्तव्यः” वार्त्ति० आम् परस्परामित्येव । भट्टिः २सर्गे उदा० ।

**परस्मैपद** न० परस्मै परोद्देश्यार्थफलकं पदम् “वैयाकरणाख्यायां चतुर्थ्याः” अलुक्समा० । पाणिनिपरिभाषितेषु लकारादेशानामष्टानां मध्ये प्रथमेषु तिप्तस्झीत्यादिषु नवसु । “शेषात् कर्त्तरि परस्मैपदम्” पा०